HSS
code No:-12

# ~~कालचक्रः~~ पुरोगामी भवतु।

पुत्रस्य विवाहं संपन्नम् जातम्। वधोः कुलं, उद्योगं, सर्वं श्रेष्ठमेव आसीत्। भोजनानन्तरं बन्धुजनाः रमानाथं विवाहस्य प्रशंसया मधुरवचनानि एव उक्तवन्तः। दिनानां अधिकपरिश्रमेण श्रान्तः सः विश्रमार्थं प्रकोष्ठं प्रवेशितवान्। पत्नी राधिका महानसे अतिथिजनानां साकं संभाषणे मग्ना आसीत्। पित्रोः ~~कर्मस्य~~ परमकर्तव्यं पूर्तीकृत्य यत् समाधानं लब्धं तस्य विवरणं दातुं रमानाथस्य वचनं नासीत्। प्रकोष्ठे भित्तौ सः अम्बायाः चित्रं यदृच्छया दृष्टवान्। मातायाः चित्रं दृष्ट्वा तस्य नेत्रे जलपूर्णौ जातौ। रमानाथस्य पिता तस्य यौवकाले एव दिवंगतः आसीत्। माता रञ्जितायाः कोऽपि उद्योगः तु नासीत्। किन्तु तस्याः दृढवचनानि एवं प्रार्थना एव तदानीं रमानाथस्य धनमासीत्। परिश्रमेण उद्योगं सम्पादयित्वा, नवगृहस्य निर्माणं अकरोत्। विद्यार्थिजीवनकाले स्वकक्ष्यायां पठितवती राधिका तस्य जीवितसखीच अभवत्। "अहो!, कीदृश आनन्देन नीतवान् तानि दिनानि ?" सः मनसा चिन्तितवान्। परन्तु ~~यथा उषायां~~ मध्याह्नवेलायाः ज्वलनमानः सूर्यः सायंकाले यथा अस्तमनं प्राप्नोति, तथा तेषां कुटुम्बे अपि ~~सन्तोषस्य दी~~ सुखस्य दीपं निर्वापितं जातम्। राधिका विद्यायुक्ता, रूपवती युवती आसीत्। विवाहनन्तरं सा रञ्जितायाः साकं पुत्रीरूपेण एव व्यवहारं कृतवती। किन्तु अतीतेषु द्विवर्षेषु राधिकायाः व्यवहारे महान् परिणाममभवत्। रमानाथ-राधिकयोः प्रथमपुत्रस्य जननान्तरं राधिका श्वश्र्वाः साकं प्रतिदिनं कलहं कर्तुं आरब्धवती।

वस्तुतः गृहकार्याणि सर्वं रञ्जिता एव करोति स्म। उद्योगार्थी राधिकायाः कृते कोऽपि बाधा न भवतु इति चिन्तया रञ्जिता प्रभाते ~~प्रा~~ प्रातराशात् आरभ्य रात्रिभोजनपर्यन्तानां कर्मणां व्यवस्थां करोति स्म। पुत्रस्य एवं स्नुषायाः कार्यालयगमनानन्तरं तयोः पुत्रस्य परिपालनमपि तस्य कर्तव्यमभवत्। रात्रौ भोजनार्थं शाकादीनां कर्तनं इत्यादि कृत्वा यदा रञ्जिता विश्रामं करोति, तदानीं एव आगत्य स्वकृतं भक्षणं परिवेषयति राधिका। किञ्चित् समयानन्तरं बुभुक्षया, रञ्जितायाः आगमनवेलायां भोजनं समाप्तं भवति स्म। पुत्रस्य तथा स्नुषायाः बुभुक्षा अधिकामिति मत्वा रञ्जिता

अधिक भोजनस्य व्यवस्थां कृतवती। किन्तु रात्रौ भोजनं समाप्तमेव अभवत्। किंकर्तव्यमूढा सा एकस्मिन् दिने एतत् प्रश्नं पुत्रस्य सम्मुखं अवतारितवती। एतत् श्रुत्वा राधिका क्रोधेन श्वश्र्वाः अपमानं कृतवती। तद्दिनात् आरभ्य राधिका स्वकृते भोजनं स्वयं पाकं कर्तुं आरब्धवती। रमानाथस्य मनसि मातुः प्रति आदरभावमासीत्, किन्तु ततोऽपि अधिकं पत्न्याः प्रति प्रेमं आसीत्। अतः रमानाथः पत्न्याः हस्तात् निर्मितं भोजनस्य सेवनं अनिच्छया अपि कृतवान्। पाचककलामधिकृत्य विना कोऽपि ज्ञानस्य राधिकया निर्मितं भोजनं यद्यपि रमानाथं न अरोचत, तथापि सः मौनं पालितवान्। क्रमेण गृहे भोजनात् आरभ्य वस्तूनां क्रयणं, आवश्यकवस्तूनां प्रयोगपर्यन्तं सर्वं द्वौ विभागौ जातौ। रञ्चितायाः प्रकोष्ठे राधिका पदं न निधास्यति, एवं राधिकायाः प्रकोष्ठे रञ्चिता निषिद्धा च अभवत्। रमानाथः यदि भार्यां रञ्चितायाः आर्या अधिकृत्य किञ्चित् वदति चेत् सा तन्निमित्ते कलहं करोति। रञ्चिता राधिकायाः साकं मन्दहासपूर्णं सौम्यभावेन व्यवहारं कर्तुं श्रममकरोत्, किन्तु राधिका रञ्चितायाः मुखमपि न दृष्टवती। रमानाथः कुटुम्बस्य नष्टस्नेहं पुनःस्थापयितुं पत्न्याः, मातुः च समीपं अभ्यर्थनां कृतवान्। रञ्चिता यथापूर्वं स्नेहेन स्नुषायाः साकं सम्भाषणं कृतवती। किन्तु श्रमं निष्फलं जातम्। राधिका रमानाथं उपगम्य रञ्चितामधिकृत्य कटुवचनानि उक्तवती। राधिका स्वस्य वर्तमानकुशलतया, 'रञ्चिता एव कलहस्य मूलकारणमिति' मिथ्या, सत्यमिति विश्वासं रमानाथस्य मनसि अजनयत्। कौमारकाले मनसि चिरस्थानं प्राप्तवती राधिकायाः उपरि रमानाथस्य भूरि विश्वासमासीत्। तस्याः वचनानि रमानाथस्य कर्णपुटे अमृतवर्षाणि इव आसन्। नवमासपर्यन्तं गर्भे, तदनन्तरं बाल्ये, शेषजीवने च परिपालनं कृतवती माता एव असत्यं वदति, तथा कौमारकालात् विजानन्ती राधिका अग्निना इव शुद्धं कर्म आचरति इति च सः निरूपितवान्। यद्यपि भोजने, वस्तूनां उपयोगे च विभाजनमभवत्, तथापि तयोः पुत्रस्य परिपालनं रञ्चिता एव कृतवती। नववादने रमानाथस्य तथा राधिकायाः गमनात् आरभ्य पञ्चवादने प्रत्यागमनपर्यन्तं तयोः पुत्रः रञ्चितायाः क्लिष्टजीवितं सरलं कृतवान्। मध्याह्ने सहाय्यार्थं कश्चन युवती आगतवती आसीत्। सा गृहकार्ये रञ्चितायाः सहाय्यं करोति तथा पुत्र्या इव आश्वसती च। सा तस्मिन् गृहे प्रचलितमानस्य कलहस्य मूलं जानाति स्म। एकदा सा रञ्चितां

अपृच्छत् - "किमर्थं एवं अपमानं सहमाना अत्र जीवसि? अन्यं कोऽपि मार्गं चिन्तयतु। यत्र भवत्याः आदरः नास्ति तत्र वासं कृत्वा प्रतिदिनं किमर्थं रोदिति?" रञ्जिता सरलतया उक्तवती - "एतत् कायरता न। मम पुत्रस्य उपरि मम विश्वासः अस्ति। किन्तु रमानाथः राधिकां विश्वसिति, निश्चयेन एकस्मिन् दिने सः वास्तविकतां ज्ञास्यति। एषः बालकः तु केवलं द्विवर्षीयः। सः किमपि न जानाति। तस्य मनसि सर्वेषां प्रति समभावना अस्ति। ममोपरि अस्य बालकस्य विश्वासमस्ति। तदर्थं अत्र मम सान्निध्यं अपेक्षितमेव।" कार्यालयात् प्रत्यागमनानन्तरं राधिका बालकं रञ्जितायाः समीपे अपि गन्तुं अनुमतिं न ददाति स्म यदि बालकः पितामह्याः साकं क्रीडति चेत्, सा बालकं बहु शास्ति स्म। एवमेव क्रमेण रमानाथः मातां भर्त्सयितुं तथा क्रूरवचनेन मातृहृदयं दग्धयितुं अपि आरब्धवान्। राधिका उत्सववेलायां स्वगृहं गत्वा मातापित्रोः कृते नववस्त्राणि ददाति चेदपि स्वश्वश्र्वाः कृते पानजलमपि न ददाति स्म। बहिः गमने स्नुषायाः श्वश्र्वाः मिथः सम्भाषणमपि नास्ति इत्यस्य चर्चां बन्धुजनेषु कृतम्। तेषां कारणं अन्विष्यमाणे, रञ्जिता स्नुषामधिकृत्य कोऽपि दोषं न उक्तवती।

रमानाथस्य पितुः मरणानन्तरं प्राप्तं ~~भू~~ परम्परागत भूमिः ग्रामे आसीत्। आपद्काले धनस्य अभावे अपि तस्य भूमेः विक्रयणं विना रञ्जिता ~~स्वभर्तुः~~ स्वभर्त्रोः स्मारकमिव तां भूमिं संरक्षितवती आसीत्। एवं एकदा तस्य भूमेः विक्रयनं कर्तुं रमानाथः राधिका च निश्चितवन्तौ। इमां वार्तां निशम्य रञ्जितायाः ~~मनो~~ रक्तं शुष्कमभवत्। सा पुत्रं उक्तवती यत् तस्मिन् भूमौ पितुः स्मरणाः सन्ति इत्यादि, किन्तु रमानाथः विना कोऽपि चिन्तां पत्न्याः साकं भूमेः विक्रयणार्थं ~~गमनार्थं~~ गतवान्। मातुः हृदयं भग्नं कृत्वा यदा सः गृहं प्रत्यागतवान् तदानीं, रञ्जितायाः मरणमेव सः दृष्टवान्। राधिकायाः कृते तत् मरणवार्ता सन्तोषजनकमभवत्। मरणानन्तरक्रियाभिः अनन्तरं रमानाथः मातुः प्रकोष्ठं प्रवेशितवान्। तत्र लब्धं रञ्जितायाः पुस्तके प्रतिदिनं गृहे प्रवृत्तानां कार्याणां तथा तस्याः शुद्धमनस्य च हृदयभेदकरीत्या विवरणमासीत्। गत वर्षेषु यद्यत् गृहे प्रवृत्तं तत् सर्वं तस्मिन् पुस्तके आसीत्। स्वपत्न्या तस्य अभावे कृतानां कर्मणां तथा वृद्धमातायाः अनुभूतानां अपमानानां चरित्रमासीत् तत्। भार्यायाः

प्रति यत् विश्वासमासीत् तस्य अन्तः अभवत्। तदनु कृतानां कर्माणां स्मृतयः तस्मिन् पश्चात्तापं अजनयत्। मातुः पादौ पश्चात्तापाश्रुभिः क्षालनीयौ इति इच्छा अभवत्। किन्तु मम तु नरकसदृशजीवितात् मुक्तिः प्राप्तवती। यद्यपि सत्यस्य बोधमभवत्, तथापि सः भार्यां पूर्वाचरितान् आधिः न पृष्टवान्। स्नेहेन तस्य साकं सः जीवितवान्। "अहो! पापी अहम्। स्वमा विस्मृत्य पत्नेः वचनानि अन्धतया श्रुतवान्। मातायाः मनसि मम प्रति कीदृश स्नेहमासीत्, विश्वासमासीत्।" रमानाथः अश्रूणि मुञ्चयित्वा चित्रस्य पुरतः स्थित

"ओः, कुत्र अस्ति?" सद्यः पत्नेः वचनानि रमानाथं भूतकालस्मृतीभिः मोचितवन्तः। "आगच्छामि।" रमानाथः उक्तवान्। पुत्रस्य विवाहदिने पितुः सान्निध्यं अत्यावश्यकं खलु। गृहनाथस्य त्वद्ये अतिथिजनाः रमानाथस्य अन्वेषणे निरताः आसन्। रमानाथः उत्थितवान्। किन्तु अश्रुमोचनं ~~तथापि~~ तव स्थगितं न अभवत्। यथाकथञ्चित् सः प्रकोष्ठात् बहिः गतवान्। "किं अभवत् नेत्रे आरक्ते स्तः।" राधिका अपृच्छत्। "प्रायः नेत्रे किमपि गतमिति," रमाना उक्तवान्। "ओः, विवाहं कियत् सुन्दरमासीत्। आवयोः वधूः सीतामिव भवति निश्चयेन सा अस्माकं गृहे आनन्दं प्रसरिष्यति। मम विश्वासः अस्ति।" राधिका उक्तवती। 'विश्वासः' तत् वाक्यं रमानाथस्य कर्णे पुनः पुनः अनुनादनमकरोत्। "विश्वासस्य फलं निश्चयेन लभ्यते। ममोपरि मातुः विश्व राधिकायाः उपरि मम विश्वासमिव, अस्याः नववध्वाः उपरि अपि विश्वासमस्ति प्रायः किञ्चित् समयानन्तरं राधिका ~~अपि~~ स्वकृतानां कर्माणां फलं अनुभवि सत्यस्य बोधनार्थं, पश्चात्तापार्थं प्रकृतिना नियोजितं कालचक्रे राधिका अपि चलतु। किञ्चित् कालात् पूर्वं विगलितं शुष्कपर्णं दृष्ट्वा हसमानं हरितपर्णम् राधिका, इदानीं साक्षात् सा शुष्कपर्णमभवत्। चलतु कालचक्रः, चलतु।" रमाना दीर्घचिन्तायां निमग्नः अभवत्। "ओः, किं चिन्तयति? वदतु, आवयोः स्नुषा अस्मान् परिपालयिष्यति खलु? विश्वासः अस्ति वा?" राधिका कुतूहलेन पृष्टवती। "आम्, पश्यावः।" रमानाथः मन्दस्वरेण प्रत्युत्तरं दत्तवान्। ~~कः~~ ~~इदानीं~~ सा अपि मत् सदृशं पश्चात्तापं अनुभवेयुः इति सः चिन्तितवान्।

स्मानान्यः प्रतीक्षायां अस्ति। ~~कालचक्रस्य~~ यात्रायां पूर्व चरित्रस्य पुनरावर्तनं भविष्यति वा, उत अपरा कथा भविष्यति? राधिकायाः विश्वासस्य फलं मधुरं वा कटु वा भविष्यति इति स्मानान्यः न जानाति। किन्तु स्वकृतानां दोषाणां ज्ञापनं तथा पश्चात्तापं सा निश्चयेन अनुभविष्यति इत्यस्य पूर्णविश्वासमस्ति स्मानान्यस्य। कालचक्रः पुरोगामी भवतु, यत्र सर्वेषां कृते पूर्वाचरितानां कर्मणां फलं भोक्तुं अवसरः लभ्येत।